॥ अथ पंचाशत्तमोऽध्याय: ॥ Chapter-50

वसिष्ठ उवाच -

नृपश्रेष्ठ ततो गच्छेदात्मछन्दामनुत्तमाम् ॥
यस्या: संदर्शनादेव प्रज्ञावाञ्जायते नर: ॥ १

भारद्वाजकुले जात: पुरासीत् सोमपा[1] द्विज: ॥
श्रीमाले स पुरश्रेष्ठे[2] ब्रह्मचारी यतव्रत: ॥ २

मौञ्जीबन्धनमारभ्य वेदाध्ययनतत्पर:
अधीते गौतमस्यान्ते न किंचित्त्वधिगच्छति ॥ ३

पारयित्वा ततो वेदान् गार्हस्थ्याय ययुर्गृहान्
न स पारयितुं[3] शक्तो वेदमेकमपि क्वचित् ॥ ४

ततो वैराग्यमापन्न: श्मश्रुलो[4] जटिलो द्विज:
निन्द्योऽभूत्सर्वलोकानां वेदानागमतो भृशम् ॥ ५

अर्थं नि:श्वस्य बहुधा भैक्ष्य निर्विण्ण[5] मानस: ॥
शुचौ देशे[6] समाविश्य चकार नियमं परम् ॥ ६

-०-०-

१ बी सोपपो

२ बी पुराश्रेष्ठे

६ ए दशे

३ ए पारितुं

४ ए स्मश्रुलो

५ ए निर्विन्नमानस:

सोमपा उवाच :-अस्मिंश्छलाशये तावत् करिष्ये जपमुत्तमम् ।।
यावच्छन्दांसि मे देवी तुष्टा दास्यति[1] भारती ।। ७

वशिष्ठ उवाच :- इत्येवं नियमं कृत्वा व्रते निरशने स्थित: ।।
नित्यं जपति यत्नेन सावित्रीं वेदमातरम् ।। ८

त्रिकालं स्नानमातिष्ठत् क्षुत्क्षामो रहसि स्थित:[2]
न प्राप्नोति मन:क्षोभं मृत्युं कृत्वा निवर्तनम् ।। ९

ततस्तपस्यतस्तस्य सप्ताहाद्भुवनेश्वरी ।।
प्रत्यक्षाभून्महीपाल तुष्टा सोमपमब्रवीत् ।। १०

देव्युवाच :- किमिच्छसि मुनिश्रेष्ठ तपसा तेन संप्रति ।।
तुष्टाहं तव दास्यामि वरं प्रार्थय मा चिरम् ।। ११

सोमपाउवाच :- शतानि त्रीणि वर्षाणां गुरुपार्श्वे कृता मया ।।
एकस्यापि न वेदस्य त्रिभागमपि बुद्धवान् ।। १२

देव्युवाच :- याहि विप्र गुरोर्गेहं[3] छन्दो धिगमनं तव ।।
भविष्यति न सन्देहो वर्षाणि मदनुग्रहात् ।। १३

-०-०-

२ वीं श्लोक नित्यजपतियन्ते
रहसि स्थित: नास्ति
३ ए जै
१ ए दास्यति

सोमपाउवाच :वेदाध्ययननिष्ठेन नीत: कालो मया बहु
न शक्तोऽध्ययुनाध्येतुं मैत्तं वाचरितुं क्वचित् ।। १४

आत्मनश्चेत् प्रवर्तन्ते छंदांसि त्वदनुग्रहात् ।।
तद्वरं देवि मे देहि याहि स्वच्छन्दमन्यथा ।। १५

यावदायु: करिष्यामि सावित्रीजपमुत्तमम् ।।
देहान्तरे ततो वेदान् ज्ञास्यामि[1] च वरोहते[2] ।। १६

वसिष्ठ उवाच :- इत्याकर्ण्य द्विजस्योक्तिं स्मितं कृत्वा सुरेश्वरी
कृपया परमाविष्टा द्विजमेतदभाषत ।। १७

देव्युवाच :- छंदांसि सरहस्यानि संपत्स्यन्ते तवात्मन: ।।
प्रात: स्नात्वा शुचिर्भूत्वा स्मर्तव्या भक्तानघ ।। १८

अनेन तव वाक्येन तुष्टा भूयो द्विजोत्तम ।।
दास्यामि नात्र संदेहो यद्यपि स्यात्सुदुर्लभम् ।। १९

आत्मन: सोमपा लेभे छन्दांसि मदनुग्रहात् ।।
आत्मच्छन्देति मन्नाम तेन ख्याति[3] भविष्यति ।। २०

-0-

१ए ज्ञास्य

२ए बराहते त

३ए ख्यातिर्भविष्यति

सोमपा उवाच :- हृदोऽयमस्तु लोकेऽस्मिन् पुण्यदः सर्वदा नृणाम् ।।
त्वया चात्र स्थिति कृत्वा प्रज्ञा देया[1] द्विजन्मनाम् ।। २१

देव्युवाच :- नित्यमत्र हृदे स्नात्वा चाष्टम्यां योर्चयिष्यति ।।
छंदासि तस्य जिह्वाग्रे सदा वत्स्यन्ति निश्चितम ।। २२

वेदाध्ययनं कुर्वाणो योऽत्र दानं प्रदास्यति[2] ।।
भविष्यति कुले तस्य वाद्या[3] वेदसन्तति: ।। २३

वसिष्ठ उवाच :- इत्युक्त्वा सा तदा देवी तत्रैवान्तरधीयत ।
स्थिता वै मूर्तिमाश्रित्य भक्तान् प्रीणाति नित्यश: ।। २४

श्रद्धासमन्वितैस्तत्र पूजा कार्या द्विजोत्तमै:
व्यतिक्रामति न च्छाया देव्या हर्म्यस्य कुत्रचित् ।। २५

ये तत्र मानवा जाड्यात्त्रिर्वेदं प्राप्य भूमिप ।।
आत्मच्छन्दां निषेवन्ते तेषां प्रज्ञाधिका भवेत् ।। २६

श्रोतव्यमिदमाख्यानं आत्मच्छन्दासमुद्भवम् ।।
प्रज्ञाप्रकर्षलिप्साय नरै: श्रद्धासमन्वितै: ।। २७

-०-०-

इति श्री स्कंद पुराणे श्रीमाल माहात्म्ये आत्मछंन्दा माहात्म्यन्नाम पंचाशत्तमो ध्याय: ।।

१ बी वेदाध्ययन शीलिक्यो यो त्र पौत्राणि दास्यति ।।

२ बी अजया

१ ए देवा